# श्रीशङ्करार्यपदावलम्व सुवर्णमालास्तुतिः

Shri Shankararyapadavalamva Suvarnamalastutih

sanskritdocuments.org

November 10, 2018

# Shri Shankararyapadavalamva Suvarnamalastutih

# श्रीशङ्करार्यपदावलम्व सुवर्णमालास्तुतिः

## Sanskrit Document Information

Text title : shankarAryapadAvalamvasuvarNamAlAstutiH

File name : shankarAryapadAvalamvasuvarNamAlAstutiH.itx

Category : deities_misc, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, gurudeva

Location : doc_deities_misc

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 10, 2018

*sanskritdocuments.org*

Shri Shankararyapadavalamva Suvarnamalastutih

# श्रीशङ्करार्यपदावलम्व सुवर्णमालास्तुतिः

(श्रीकालटिक्षेत्रे)

ओङ्कारपङ्कजमधुव्रत वेदशीर्ष-
कञ्जातबालदिननाथ कृपासमुद्र ।
वृन्दारकेन्द्रपदतौच्छ्यमनःप्रदायिन्
श्रीशङ्करार्य मम देहि पदावलम्बम् ॥ १॥

नत्वा पदाम्बुजनियुग्ममहो यदायं
वाचस्पतित्वमधिगच्छति जन्ममूकः ।
स त्वं कृपार्णव सरोरुहपत्रनेत्र
श्रीशङ्करार्य मम देहि पदाबलम्बम् ॥ २॥

मत्तो मनःप्रभव एष पुरा यदीय-
नेत्राग्निनाऽऽप तरसा भसितस्वभावम् ।
स त्वं विरक्तिमचलां प्रवितीर्य मह्यं
श्रीशङ्करार्य मम देहि पदावलम्बम् ॥ ३॥

शङ्कानिवारणपटो प्रणतव्रजस्य
यं कालकाल इति कुम्भभवो जगाद ।
स त्वं वितीर्य परमायुरभीष्टपूगं
श्रीशङ्करार्य मम देहि पदावलम्बम् ॥ ४॥

कन्येव रूपगुणशालिनमादरेण
मर्त्यं प्रमोदभरतः स्वयमेव मुक्तिः ।
यद्वाक्सुधाप्रणयिनं वृणुते हि स त्वं
श्रीशङ्करार्य मम देहि पदावलम्बम् ॥ ५॥

राजाधिराजपेदवीं तरसा प्रयाति
यत्पादपङ्कजयुगं सकृदेव नत्वा ।
दीनाग्र्याम्यपि विना कमपि प्रयत्नं

श्रीशङ्करार्य मम देहि पदावलम्बम् ॥ ६॥

यत्यग्रयायिजनतावनबद्धदीक्ष
तत्त्वं प्रबोध्य तरसा बहुलैः स्वकीयैः ।
ग्रन्थैश्च पूर्णकरुणाभरितैः कटाक्षैः
श्रीशङ्करार्य मम देहि पदावलम्बम् ॥ ७॥

स्तोत्रं त्वदङ्घ्रिकमलालितमानसेन
सूक्तं पठेद्य इह भक्तियुतान्तरङ्गः ।
पात्रं भवेत्स खलु सर्वसुखस्य सत्यं
न द्वापरोऽत्र विषये मनसापि कार्यः ॥ ८॥

इति शृङ्गेरि श्रीजगद्गुरु श्रीसच्चिदानन्दशिवाभिनवनृसिंह-
भारतीस्वामिभिः विरचिता श्रीशङ्करार्यपदावलम्बसुवर्णमालास्तुतिः
सम्पूर्णा ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Shankararyapadavalamva Suvarnamalastutih*
pdf was typeset on November 10, 2018

Please send corrections to *sanskrit@cheerful.com*